International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 79-82
© 2026 IJMH
www.themultijournal.com
Received: 11-03-2026
Accepted: 23-03-2026
Publish : 24-03-2026

**कुमारी शीतला**
शोधच्छात्रा, दर्शनविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालपरिसरः

**Correspondence:**
**कुमारी शीतला**
शोधच्छात्रा, दर्शनविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालपरिसरः

# जशपुरस्थ आदिवासिजनजातीयान् मुख्यधारायामानेतुं सनातनसंतसमाजस्य भूमिका

**कुमारी शीतला**

**शोधसारांश:-** जशपुरराज्यक्षेत्रस्य स्थापना अष्टादश शताब्द्यामभवत्। जशपुर इति मण्डलं 1998 तमे वर्षे 25 पंचविशतितारिकायां रायगढतः पृथक् भूत्वा नवीनमण्डलरूपे आविर्भूतम्। जशपुरराज्यक्षेत्रस्य 1948 तमे वर्षे भारते विलयः अभवत्। जशपुररियासतः स्वकीय जनजातिय-संस्कृतिः रियासतकालीन प्रशासनं तथा च इसाई मिशनरीभिः कृतकार्यैः क्षेत्रीयेतिहासे विशिष्टं स्थानं विद्यते। छत्तीसगढप्रदेशस्य जशपुर क्षेत्रे ईसाई मिशनरीणां व्यापकः प्रभावः आसीत्। वर्तमाने समये जशपुर छत्तीसगढस्य प्रमुखं मण्डलमेव । स्वविशिष्टभौगोलिकस्थितेः जनजातीयसंस्कृतेश्च कारणेन जशपुरस्य विशिष्टं स्थानं वर्तते। जशपुरस्थ आदिवासी-जनान् मुख्य-धारायामानेतुं सनातनसंतसमाजस्य महती भूमिका वर्तते। शोधपत्रमिदं सनातनसंतसमाजस्य भूमिका योजना-उद्देश्यानां तथा च आदिवासी समाजं प्रति कृतकार्याणां प्रकाशनं कृत्वा शास्त्रसिद्धान्तानां भूमिका का? अस्यापि विश्लेषणं करोति ।

**कूटशब्दाः** - इतिहासः, राज्यक्षेत्रम् (रियासत), सामाजिकस्थितिः, संस्कारः, शिक्षा, सनातनधर्मसंत-समाजस्य स्थापना , संस्थासूत्राणि।

**प्रस्तावना-** भारते ब्रिटीश अधीनतायाः समये अनेके राज्यक्षेत्राणि आसन्। एतेषां राज्यक्षेत्राणां विदेशनीतयः ब्रिटीशसम्राज्याधीनाः आसन् । परन्तु गृहनीतौ अधिकारः राज्ञः नाममात्रमेवासीत् । यतोहि देशस्थराज्यक्षेत्राणां कृते एतद् भयमासीत् यत् ब्रिटीशसाम्राज्यं कदा राज्यक्षेत्राणां विलयं कुर्यात् अथवा राज्यक्षेत्रस्य राजानमपदस्थं कृत्वा कश्चित् अन्यं राजानं न कुर्यादिति तथापि भारते स्वतन्त्रताकालं यावत् अत्र 562 राज्यक्षेत्राणि आसन्। मध्यप्रान्तस्य प्रमुखराज्यक्षेत्रस्य जशपुरराज्यक्षेत्रम् अन्यतममासीत् । प्रारम्भे अयं बंगाल प्रान्ते आसीत्। 1905 तमे वर्षे जबलपुरमण्डलं एवञ्च एतेन सम्बद्धाः पञ्चराज्यक्षेत्राणि - (बामरा, रेहराखोल, सोनपुर : पटना काहांडी) च बंगालराज्यं प्रति स्थानान्तरितानि। एतत्प्रतिदाने च चांगभाखर कोरिया, सरगुजा,उदयपुर,जशपुरश्चेति राज्यक्षेत्राणि मध्यप्रान्तस्य भागानि अभवन्। जशपुरराज्यक्षेत्रे आदिवासिनां जनसंख्या अधिका आसीत्[1]। ईसाई मिशनरीभ्यः श्रीरामेश्वरेण तेषां मतानां खण्डनं कृत्वा भारतीय परम्परा, सनातनधर्मस्य च जनान्प्रति परिचयः कारितः। तेन न केवलं ईसाईमिशनरीणां हस्तात् रक्षिताः अपितु धर्मान्तरणादपि जनाः रक्षिताः ।

आदिवासिजनानां हिताय तेन प्रमुखकेन्द्राणि स्थापितानि। तेषु गहिरा, सामरबार, श्रीकोट, कैलाशगुफा इत्यादीनि। आदिवासिसमाजस्य विकासाय परिष्काराय नैरन्तर्यं कार्यं कुर्वन्ति ।

**जशपुरस्य सामरबारक्षेत्रे श्रीरामेश्वरस्यागमनम् -** श्रीरामेश्वरेण गहिराग्रामस्य जनानां जीवनं परिवर्त्य जशपुरक्षेत्रं प्रविष्टम्। रायगढमण्डलं पुरातनेषु चतुर्षु राज्यक्षेत्रेषु विभक्तः - रायगढ़, सारंगबाद, धर्मजयगढ़ (उदयपुर) जशपुरञ्च[2]। जशपुरक्षेत्रान्तर्गततया चतुश्शताधिकैकसहस्रं ग्रामाः आसन्।

वर्तमाने समये ते एव भारतशासनेन 657 ग्रामेषु 335 पंचायतेषु विभक्ताः। सर्वादौ श्रीरामेश्वरः बगीचाविकासखण्डस्य सामरबारे 1946 तमे वर्षे समागतवान् । गहिरातः पदाभ्यां चलन् कोडासियां मैनीनदीं ततः सामरबारम् आगतवानासीत्[3] ।

**जनजातीयेषु विशिष्टकार्यम् –** सर्वादौ सामरबारं प्रति श्रीरामेश्वरस्यागमनं 1946 तमे वर्षे अभवत्[4]। अगमनात् परम् पर्वतारोहणं कृत्वा सम्पूर्णस्य क्षेत्रस्य भ्रमणं कृतवान् । एतत् क्षेत्रं गायबुडा इति नाम्ना विख्यातम्। नियन्त्रणदृष्ट्या क्षेत्रमेतद् खुड़ियाराजेति क्षेत्रे समायाति। तत्र पहाड़ी कोरवा, तथाच उत्तरप्रदेश-मिर्जापुर क्षेत्राभ्यां आगतानां यादवानां वने निवासः आसीत् । कतिपयक्षेत्रेषु एकः द्वौ वा परिवारौ निवसतः स्म । तौ वानरं हत्वा भक्ष्यत: आस्ताम्। समाजोऽयं विरहोर इति उच्यते। यदा श्रीरामेश्वर: तत्र गतवान् तदा काश्चन घटनाः अभवन्। तत्रत्या: जनाः मनुष्यं हत्वा भक्षयन्ति स्म । अत्र आवर्षं भृशं शैत्यं भवति स्म । रात्रौ जनाःअग्निं प्रज्वाल्य शैत्यात् स्वात्मानं रक्षन्ति स्म। श्रीरामेश्वर: बाल्यकालादेव महिला: पुरुषा: च कौपीनादिलघुवस्त्राणि धारयत: दृष्टवान् आसीत् किन्तु अस्मिन् क्षेत्रे महिलाः पुरुषाश्च निर्वस्त्रमेव भवन्ति स्म। तेषां स्कन्धौ धनुः बाणाश्च भवन्ति स्म। स्वच्छताया: सर्वथा अभाव: आसीत्। पहाडीकोरवा इति जनानां यादवै: सह कलहः सर्वदा भवति स्म। अत्र संवादस्य प्रश्न: एव नासीत् । यतोहि उभावपि परस्परं भाषावगमने असमर्थौ आस्ताम्। कोरवाजनानां भाषा तु अद्यापि नावबुध्यते । किन्तु श्रीरामेश्वर: चतुर्पञ्चदिनानि यावत् तत्र स्थित्वा आदिवासिनां जीवनस्य अध्यननं कृतवान्। श्रीरामेश्वरः सामरवारे अनन्तसायः, जगमोहन पटेलः, मैन्या: सुधनजठा आदिभिः जनै: सह संपर्कं कृतवान्। सहयोगिभि: सह सम्मिल्य समाजे भ्रमित्वा-भ्रमित्वा समस्यां दृष्टवान्। सर्वत्र "नौकरशाही" इति आसीत्। अंचलेऽस्मिन् आवागमनस्य, विद्युत:, पत्रालयस्य च दूरं यावत् कल्पनापि नासीत्। केवलमत्र क्षेत्रं परित: वनानि एव। विकासस्य नाम्नि सर्वं शून्यमासीत्। आदिवासिनामुपरि राजा शासनं करोति स्म। किन्तु तेषां जीवनेन सह राज्ञ: लेशोऽपि सम्बन्धः नासीत् । स्वतंत्रताया: पूर्वं तदनन्तरमपि आदिवासिनां वनस्य आरक्षककर्मचारिभिः शोषणकार्यं क्रियते स्म । वने निवसद्भिः वन्यपशुभिः सह संघर्षं कर्तुं प्रभवन्ति स्म। किन्तु शासकीयकर्मचारिभ्यः भयभीताः आसन् यतो हि कदा कः तेषां गृहात् वस्तूनि नयेत्। कदा कश्चन तान् बन्धने कुर्यात्। व्यापारिभि: कृतशोषणस्य विषये नावबोधः आसीत्। यतः ते स्वकीयवन्योत्पादनस्य मूल्यं न जानन्ति स्म। तस्य लाभं व्यापारिण: स्वीकुर्वन्ति स्म। तेषाम् आदिवासिनां स्वकीया: गावः महिषाः वृक्षाः च भवन्ति स्म। स्ववनोत्पादनम्-तिन्दुक: मधूकः च किन्तु तेषां स्वकीयवस्तुष्वपि अधिकार: नासीत्। यतोहि सर्वकारीकर्म-चारिभिः यथेच्छया तेषां वस्तुनां स्वीकरणं क्रियते स्म भयवशात् ते तान् वक्तुमसमर्था: आसन्। व्यापारिणामपि तद्वत् व्यवहारः आसीत्। यद् किञ्चित् धनं यच्छन्ति स्म तावदेव स्वीकुर्वन्ति स्म। प्रियालो: (चिरोंजी) इत्यस्य स्थाने तेभ्यः लवणं देयमिति क्षेत्रेऽस्मिन् प्रसिद्धमासीत्। अंचलेऽस्मिन् आदिवासिनां शोषणं आर्थिक-राजनैतिक सामाजिकदृष्ट्या अत्यधिकमासीत्। तदानीमपि आदिवासिसमाजस्य रक्षायै कोऽपि अग्रे नागत: न तु समाजसेवकः न च राजनीतिज्ञः। एताः घटना : केनचिद् दृष्टा: सः रामेश्वरः आसीत्। सः आदिवासिनां सर्वविधं शोषणं, संस्कृतेः पतनं च दृष्ट्वा भृशं दु:खं अनुभूतवान्। आदिवासिन: मदिरापाने मग्नाः, तेषामशिक्षां इति दृष्ट्वा चिन्तितः दु:खितश्चासीत्। श्रीरामेश्वर: क्षेत्रेऽस्मिन् जनजागरणं कृत्वा अत्याचारस्य विरुद्धं जनचेतनां जागरयितुं कृतसंकल्पः सन् कर्तव्यपथे च चलनमारब्धवान्। परिणामतः तमनुसरतां जनानां विशालः जनसमूहः तस्य पृष्ठे अचलत्। तं जनसमूहं स्वीकृत्यैव जशपुरक्षेत्रे शान्तिमयीं क्रान्तिं कृत्वा प्रदर्शयत् ।

सामरबारनाम्नः ग्रामः आसीत् तत्रैव आगत्य एकस्मिन् अलिन्दे निवासमकरोत्। प्रतिदिवसं स्नानं, ध्यानं, भजन-कीर्तनं च स्वयमेव भोजननिर्माणम् एषः एव नियमः आसीत्। रात्रौ कीर्तनसमये प्रामुख्येन अमृतसायः, जगमोहनः, सुधनपटेल: आदयः भवन्ति स्म। ग्रामं परितः निवसन्तः जनाः आश्चर्यचकिताः भवन्ति स्म यत् कंवर जातेः जनोऽयं अन्येषां हस्तात् जलं न पिबति, स्वयं भोजनं निर्माति प्रतिदिनं स्नानं ध्यानं पूजां च करोति। स्वहस्तादेव स्वच्छतां करोति। एतादृशस्य सन्तस्यागमनं, व्यवहारश्च ग्रामावासिभिः कदापि न दृष्टः। सः नित्यं भ्रमणं करोति स्म तथा च रामचरितमानसस्य कथां श्रावयति स्म। तेनैव ग्रामं परितः संकीर्तनस्य प्रचारः अभवत्। शनैः - शनैः तस्य दर्शनार्थं जनसमूहस्य गमनागमनं प्रारब्धमासीत् । तेषां भक्तिमयस्वरूपेण अनेकशः जनाःप्रभाविताः सन् विशाल: जनसमूहः तस्य भक्त: अभवत् । श्री रामेश्वर: आगतेभ्य जनेभ्यः शिक्षां प्रयच्छति स्म यत् मदिरापानं न कुर्वन्तु, मांसभक्षणं न कुर्वन्तु, स्वच्छं वस्त्रं धरन्तु इति। रामेश्वरः मांसमद्यं त्यागं कारयित्वा तान् सात्विकान् अकरोत्। सः स्वयं हस्ताभ्यां खनित्रं कुदालीं च चालयित्वा भूखण्डान् कृषिक्षेत्ररूपेण परिवर्त्य कृषिकर्म शिक्षितवान्[5] ।

**भारतीयसंस्काराणां शिक्षा -** भारतीय संस्कृत्यानुसारं संस्कारं, पूजापाठं, स्वच्छतां, मानवीयाचरणं कर्तुं च व्यावहारिकं ज्ञानं प्रसारितम्। अनेकाषां शैक्षणिकसंस्थानां स्थापनां कृत्वा आदिवासि-जनेभ्य: शिक्षां दत्वा तेषां जीवने ज्ञानप्रकाश: समानीत:। श्री रामेश्वरस्य सेवया आध्यात्मिक-संरक्षणेन च क्षेत्रस्य जनानां जीवनस्तरे अभूतपूर्वं परिवर्तनं अभवत्[6]।

**सनातनधर्मसंतसमाजस्य स्थापनया -** रामेश्वरस्य व्यक्तित्वस्य प्रभावः चतुर्दिक्षु प्रसरितः। तत्क्षेत्रे जनाः तं अलौकिकशक्तिसम्पन्नं पुरुषं इव मन्यन्ते स्म ।

रामेश्वरः स्वसाधनया आत्मबलेन च सर्वशक्तिमत: ईश्वरस्य साक्षात्कारमकरोत् । तस्य चमत्कारिस्वरूपस्य दर्शनं जना: अकुर्वन्। किन्तु श्रीरामेश्वरेण कदापि चमत्कार-बलेन समाजस्य संघटनस्य प्रयासः न कृतः। अपितु महता परिश्रमेण, कठोरसाधनया, ज्ञानाधारेण च एकस्य सुसंस्कृतस्य संघटितसमाजस्य स्थापना कृता। परिणामत: नित्यं तेषां शिष्याणां भक्तानाञ्च संख्या प्रवर्धमानासीत्। एतदर्थं

सर्वान् जनान् संघटनसूत्रे बन्धयितुं विचारं कुर्वन्नासीत् यत् आदिवासिसमाज: न केवलं व्यक्त्या सह अपितु संघटनरूपात्मक: भवेत्। जना: कथं संघटनात्मकरूपे एकीभूताः स्यु: इति तेषां चिन्तनमासीत्। 1943 तमे वर्षे श्रावणमासस्यामावस्यायां अर्धरात्रौ 'सनातनसंतसमाज'स्य स्थापना अभवत्। समेऽपि भक्ता: संतसमाजस्या-ङ्गीभूता: अभवन्[7]। सामान्यमनुष्यान् सुसंस्कृतान् कुर्म: तदा एव समाजे अपेक्षितानि परिवर्तनानि आनेतुं शक्यन्ते । संस्कारितानां जनानां समूहः एव संघटितलोकशक्तिं कर्तुं शक्नोति इति विचिन्त्य श्रीरामेश्वरेण समाजिकानां संघटनमारब्धम्। समाजस्य ध्वजः शुभ्र: भवेदितिनिश्चित: एवञ्च शिष्याणां गृहस्य प्राङ्गणे तुलसी चबूतरा इत्यारोपयितुं निर्देशः कृतः। सर्वेषां शिष्याणां जीवनं सत्पुरूष इव द्रष्टुम् इच्छति स्म अतएव संस्कारं दातुमारब्धवान्। शुचितापूर्णानां जनानां समाज: भवेत् यत्र समाज: एकीभूय राष्ट्रजीवनाय स्वकीयां भूमिकां निर्वहेत् इति । सनातनसंतसमाजस्य स्थापनाया: पश्चात् स्वशिष्येभ्य: केचन नियमा: मर्यादाश्च निर्धारिताः। तेषां पालनं प्रत्येकं जनः कठोरतया कुर्यात् इति निर्देश:समाजे स्थाने-स्थाने दत्तः[8]।

**सनातनसन्तसमाजस्य सूत्राणि[9]-**

1. प्रातः स्नानोपरान्त तुलसीवृक्षे जलसमर्पणम् ।
2. प्रतिगृहं पूजास्थलं भवेत् ।
3. पाकशालाया: प्रतिदिनं लेपनम् ।
4. भोजनात् अग्नये भोग:, गवये गोग्रासञ्च निष्कासनम् ।
5. समाजस्य परिवारस्य सर्वेषां सदस्यानां कृते सम्मानजनकेन शब्देन सम्बोधनम् ।
6. प्रातः सायं परिवारस्य ज्येष्ठसदस्येभ्य: शरणम् (प्रणाम) इति शब्देन सम्वेधनम्।
7. प्रतिदिनं समाजाय मुष्टिमात्रं तण्डुलं (25 पैसे) नाणकं च निष्कासनम्।
8. प्रत्येकं गुरूवासरे, एकस्मिन्परिवारे रामचरितमानसस्य पाठ: भवेत् ।
9. पर्वेऽस्मिन् वारमेकम् त्रिदिवसात्मकं श्रमदानम् ।
10. मांसाहारात् मदिरापानात् च पूर्णत: त्यागकरणम्।
11. श्वेतवस्त्रधारणम् ।
12. षोडशसंस्काराणां पालनं वैदिकविधौ विवाहश्च ।
13. शुभ्रध्वजस्थापनं प्रतिवर्षं परिवर्तनं च 1.25 नाणकानि 2 किलो परिमितं तण्डुलं समर्पणम् ।

**संस्थापरिचयः-** पूज्यगहिरा गुरूजी श्रीरामेश्वरेण 1943 तमे वर्षे श्रवण-अमावस्यायां "सनातनधर्मसन्तसमाज" नाम्न: संस्थाया: औपचारिकरूपेण स्थापना कृता । मूलतः आदिवासीभिः संचालिता संस्थेयम्। श्रीरामेश्वरस्य निरन्तरपरिश्रमेण आध्यात्मिकसंरक्षणेन च बाह्यसहयोगं विना श्रमदानै: मुष्टिदानैश्च संस्थेयं व्यापकी रचनात्मकी चाभवत्। रामेश्वरःएवञ्च तस्य सहस्रशः स्वयंसेविनः अनुयायिनश्च-भ्रमित्वा-भ्रमित्वा रामेश्वरस्य आदर्शाणां विचाराणां प्रसारं प्रचारं च कृतवन्त:[10]। परिणामस्वरूपः रायगढम्, सरगुजा, बिलासपुरम्, झारखण्ड:, ओडिशा, उत्तरप्रदेश इति सीमावर्तिक्षेत्राणां लक्षशः आदिवासिनः, दलिताः, पश्चाद्वर्तीवर्गा: (पि.वर्ग) जनाश्च संस्थायाः आदर्शै: सहाभिन्नतया संयुक्ता: अभवन्। तत्रत्या: परस्परं परमात्मभावं प्रकटयन्त: जना: अभिवादनाय "शरणम्"[11] इति शब्दप्रयोगं कुर्वन्ति।

**षोडशसंस्काराः[12] लीलाकीर्तनञ्च-** दुर्भाग्यवशात् आदिवासिनां क्रमबद्धस्य वास्तविकेतिहासस्य लेखनं नाभवत्। प्राय: 500 वर्षाणि यावत् विदेशीयाक्रान्तानां नृशंसता इति कारणेन बहुसंख्यका: जना: समभूमिक्षेत्रं त्यक्त्वा वन्यक्षेत्रं प्रति पलायिता:। दीर्घकालं यावत् वन्य-परिस्थितिषु जीवन-यापनकारणेन जनै: मूलधर्मः संस्कृतिश्च विस्मृता। जनानामुपसनाया: अवधारणा अंधविश्वासः, मन्त्रक्रिया, बलिप्रथा च इत्येतावत्सीमिता आसीत् । अशिक्षेति कारणेन संस्काराणां परम्पराणां च स्वरुपं विकृतमभवत्। आङ्गलेयाः भारतं आगताः भारतीयसमाजं विभजयितुं स्वकीयनीतिभि: वनवासिन: आदिवासिन् इत्युक्त्वा सनातनसंस्कृते: सकाशात् पृथक्कृत्वा प्रस्तोतुं सफलं प्रयासं कृतवन्तः। वनवासिनां दशा तथा तेषामुपरि जायमानस्य राजनीतेः कारणात् श्री रामेश्वरः क्षुब्ध: आसीत्। तेन वनवासिषु व्याप्तभ्रान्ती: दूरं कृत्वा भारतीयगौरवशालीधार्मिक-सांस्कृतिकेतिहासेन परिचयं कारयित्वा सनातन-परम्परायाः मुख्यधारायामानीय राष्ट्रस्यैतिहासिकं कार्यं कृतम्। श्रीरामेश्वरस्य प्रेरणया लिखितानि पुस्ताकानि। यथा- चन्द्रवंश दर्पण" सूर्यवंशालोक:, उरमाल-वंशावली चादिषु वनवासिनां कुलस्य गोत्रस्य संस्काराणां तथा च परम्पराणां विशदविवेचनं कृतं वर्तते[13]।

क्रमेऽस्मिन् सनातनपरम्परानुरूपं वनवासिनाम् उपासनापद्धितियज्ञ-संस्कारसत्संगनैतिकाचरणानां व्यावहारिकज्ञानार्थं व्यापकस्तरे आन्दोलनं प्राचलत्। रामेश्वरस्य प्रेरणया अद्य स्थाने-स्थाने सुदुरं वनाञ्चलेषु वनवासिभि: नियमितरूपे शताधिकयज्ञानां, विभिन्न-संस्काराणां, सत्सङ्गानां, लीलाभजनानां चायोजनं क्रियते। अनेन माध्यमेन नैके जना: संतसमाजे संयुक्ता: अभवन्। एवम्प्रकारेण लक्षश: जनानामुद्धारं कृतवान्। एतादृशानां कार्याणां कृते भारतसर्वकारेण इंदिरागाँधीराष्ट्रीयसमाजसेवा-पुरस्कारेण 1986-87 तमे वर्षे, मध्यप्रदेशशासनेन मध्यप्रदेश-बिरसामुण्डाआदिवासिसेवापुरस्कारेण 1996-97 तमे वर्षे रामेश्वर: सम्मानित:[14]।

**निष्कर्ष: -** मानवसमाजस्योद्धाराय आदिवासिमहापुरूष: श्रीरामेश्वर: जशपुरमण्डलस्य सामरबारक्षेत्रस्य आदिवासिजनानां कृते महत् कार्यं कृतवान्। तत्रत्या: आदिवासिन: वन्यजीवने स्वसंस्कारं धर्मं च

विस्मृत्य पशुवत् जीवनं यापयन्ति स्म। तेषां जीवनमत्यन्तं दयनीयमासीत् । वस्त्रमपि न धरन्ति स्म, अपक्वं मांसं भक्षयन्ति स्म। सर्वकारीकर्मचारिभि: एतेषाम् महत् शोषणं क्रियते स्म। एतत्सर्वं दृष्ट्वा केनापि चिन्तनं कृतं चेत् स:श्रीरामेश्वर: आसीत्। लोककल्याणकामनया तादृशे कठिने समये तेन 1943 तमे वर्षे सनातनसंतसमाजस्य स्थापना कृता। अत्र जनानाम् अंधविश्वासं, मन्त्रक्रियां, बलिप्रथां च दूरीकृत्य सभ्यसमाजस्य कल्पनया जनसंघटनं कृतवान्। भारतीयसंस्काराणां शिक्षा, स्वच्छता-मानवीयाचरण-नैतिकमूल्य-राष्ट्रियदायित्वादिनामवबोधं कारयित्वा भारतीयसंस्कृत्या: बलेन लक्षश: जनानां सामाजिकजीवनं परिवर्तितम्। तस्य जीवनम् आदिवासिनाम् उपेक्षितवर्गाणां कृते समर्पितमासीत्। महनीयकार्यमस्य महापुरूषस्य यतो हि अद्यापि आदिवासिनां विकासाय सनातनधर्मसन्तसमाज: नैरन्तर्येण कार्यं करोति ।

**सन्दर्भग्रन्थसूची –**


1. डॉ रामानुज प्रताप सिंह धुर्वे, (03March2024) जशपुर रियासत का ऐतिहासिक अध्ययन, *AGPE THE ROYAL GONDWANA RESEARCH JOURNAL OF HISTORY, SCIENCE, ECONOMIC, POLITICAL AND SOCIAL SCIENCE Vol-5*
2. जशपुर-संस्कृति प्रकृति एवं पर्यटन, संकलनम्- डॉ विनय रक्षित, डॉ राजीव रंजन तिग्गा
3. वनाञ्चल का नंदादीप, विरचित:सुनील किरवई, समता कालोनी, रायपुर (छ. ग.) प्रथम संस्करणम् 2000
4. अभिनवऋषि गाहिरा गुरु रामेश्वर, विरचित: शिवकुमार त्रिपाठी, प्रकाशक: छत्तीसगराज्य हिन्दी ग्रन्थ अकादमीरायपुरम्, पी-3,पं रविशंकरशुक्लविश्वविद्यालय परिसर:, रायपुरम् 492010(छत्तीसगढ़म्)
5. जातिभास्कर: विरचित: पण्डितज्वलाप्रसादमिश्र:, प्रकाशक: आर्यावर्त संस्कृति संस्थान डी-48 गली न.3 दयालपुरम्, करावलनगरमार्ग:, दिल्ली -110094 संस्करणम् -2023
6. चन्द्रवंशदर्पणम्,विरचित:परमपूज्यरामेश्वरगहिरागुरू, प्रकाशनम्-सनातन संत समाज आश्रम सामरबार: 1982
7. स्वर्णजयन्ती पीयूष पत्रिका, सम्पादक:- संजयदीक्षित, सनातनसंतसमाज: आश्रम सामरबार: पो० दुर्गापारा जशपुरम् छ.ग.
8. सूर्यवंशालोक:, लेखक:- मनोहरशास्त्रि, प्रकाशक:- सनातन संत समाज रायगढ मध्यप्रदेश: 1977
9. उरमालक्षत्रीवंशावली, लेखक:-अवधेशप्रसाद,प्रकाशक:- संतसमाज आश्रम श्रीकोट: 1982
10. श्रीमद्भागवद्गीता, गोविन्दभवनम्, कार्यालय: कोलकता का संस्थान, गीताप्रेस, गोरखपुरम् 273005


**संदर्भ –**

[1] डॉ रामानुज प्रताप सिंह धुर्वे, (2024)जशपुर रियासत का ऐतिहासिक अध्ययन *AGPE THE ROYAL GONDWANA RESEARCH JOURNAL OF HISTORY, SCIENCE, ECONOMIC, POLITICAL AND SOCIAL SCIENCE, Vol-5, page 1*

[2] अभि./पृ.सं.59

[3] वना./पृ.सं.53-54

[4] तत्रैव पृ.सं.59-60

[5] तत्रैव पृ.सं.60-61

[6] वना./पृ.सं.33,34,37,38

[7] वना./पृ.सं.44-45

[8] वना./पृ.सं.47

[9] वना./पृ.सं.47-48

[10] स्वर्ण ज.पी./पृ.सं.9

[11] वना./पृ.सं.8

[12] स्वर्ण ज.पी./पृ.सं.11-12

[13] तत्रैव पृ.सं.11-13

[14] अभि./पृ.सं.77